# Shri Gayatri Sahasranama Stotram

# શ્રીગાયત્રીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : gAyatrI sahasranAma stotram 1-1

File name : gAyatrisahasra.itx

Category : sahasranAma, devii, gAyatrI, stotra, devI

Location : doc_devii

Author : Traditional

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : See corresponding nAmAvalI. This is shorter a version. Refer to extended version 1-2.

Latest update : February 01, 2005, July 18, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 7, 2024

*sanskritdocuments.org*

# શ્રીગાયત્રીસહસ્રનામસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।

ધ્યાનમ્ -

રક્તશ્વેતહિરણ્યનીલધવલૈર્યુક્તાં ત્રિનેત્રોજ્જ્વલાં
રક્તારક્તનવસ્રજં મણિગણૈર્યુક્તાં કુમારીમિમામ્ ।
ગાયત્રીં કમલાસનાં કરતલવ્યાનદ્ધકુણ્ડામ્બુજાં
પદ્માક્ષીં ચ વરસ્રજઞ્ચ દધતીં હંસાધિરૂઢાં ભજે ॥

ૐ તત્કારરૂપા તત્ત્વજ્ઞા તત્પદાર્થસ્વરૂપિણિ ।
તપસ્સ્વ્યાધ્યાયનિરતા તપસ્વિજનનન્નુતા ॥ ૧॥

તત્કીર્તિગુણસમ્પન્ના તથ્યવાક્ચ તપોનિધિઃ ।
તત્ત્વોપદેશસમ્બન્ધા તપોલોકનિવાસિની ॥ ૨॥

તરુણાદિત્યસઙ્કાશા તપ્તકાઞ્ચનભૂષણા ।
તમોપહારિણિ તન્ત્રી તારિણિ તારરૂપિણિ ॥ ૩॥

તલાદિભુવનાન્તસ્થા તર્કશાસ્ત્રવિધાયિની ।
તન્ત્રસારા તન્ત્રમાતા તન્ત્રમાર્ગપ્રદર્શિની ॥ ૪॥

તત્ત્વા તન્ત્રવિધાનજ્ઞા તન્ત્રસ્થા તન્ત્રસાક્ષિણિ ।
તદેકધ્યાનનિરતા તત્ત્વજ્ઞાનપ્રબોધિની ॥ ૫॥

તન્નામમન્ત્રસુપ્રીતા તપસ્વિજનસેવિતા ।
સાકારરૂપા સાવિત્રી સર્વરૂપા સનાતની ॥ ૬॥

સંસારદુઃખશમની સર્વયાગફલપ્રદા ।
સકલા સત્યસઙ્કલ્પા સત્યા સત્યપ્રદાયિની ॥ ૭॥

સન્તોષજનની સારા સત્યલોકનિવાસિની ।
સમુદ્રતનયારાધ્યા સામગાનપ્રિયા સતી ॥ ૮॥

સમાની સામદેવી ચ સમસ્તસુરસેવિતા ।
સર્વસમ્પત્તિજનની સદ્ગુણા સકલેષ્ટદા ॥ ૯॥

સનકાદિમુનિધ્યેયા સમાનાધિકવર્જિતા ।
સાધ્યા સિદ્ધા સુધાવાસા સિદ્ધિસ્સાધ્યપ્રદાયિની ॥ ૧૦॥

સદ્યુગારાધ્યનિલયા સમુત્તીર્ણા સદાશિવા ।
સર્વવેદાન્તનિલયા સર્વશાસ્ત્રાર્થગોચરા ॥ ૧૧॥

સહસ્રદલપદ્મસ્થા સર્વજ્ઞા સર્વતોમુખી ।
સમયા સમયાચારા સદસદ્ગ્રન્થિભેદિની ॥ ૧૨॥

સપ્તકોટિમહામન્ત્રમાતા સર્વપ્રદાયિની ।
સગુણા સમ્ભ્રમા સાક્ષી સર્વચૈતન્યરૂપિણી ॥ ૧૩॥

સત્કીર્તિસ્સાત્વિકા સાધ્વી સચ્ચિદાનન્દરૂપિણી ।
સઙ્કલ્પરૂપિણી સન્ધ્યા સાલગ્રામનિવાસિની ॥ ૧૪॥

સર્વોપાધિવિનિર્મુક્તા સત્યજ્ઞાનપ્રબોધિની ।
વિકારરૂપા વિપ્રશ્રીર્વિપ્રારાધનતત્પરા ॥ ૧૫॥

વિપ્રપ્રીર્વિપ્રકલ્યાણી વિપ્રવાક્યસ્વરૂપિણી ।
વિપ્રમન્દિરમધ્યસ્થા વિપ્રવાદવિનોદિની ॥ ૧૬॥

વિપ્રોપાધિવિનિર્ભેત્રી વિપ્રહત્યાવિમોચની ।
વિપ્રત્રાતા વિપ્રગોત્રા વિપ્રગોત્રવિવર્ધિની ॥ ૧૭॥

વિપ્રભોજનસન્તુષ્ટા વિષ્ણુરૂપા વિનોદિની ।
વિષ્ણુમાયા વિષ્ણુવન્દ્યા વિષ્ણુગર્ભા વિચિત્રિણી ॥ ૧૮॥

વૈષ્ણવી વિષ્ણુભગિની વિષ્ણુમાયાવિલાસિની ।
વિકારરહિતા વિશ્વવિજ્ઞાનઘનરૂપિણી ॥ ૧૯॥

વિબુધા વિષ્ણુસઙ્કલ્પા વિશ્વામિત્રપ્રસાદિની ।
વિષ્ણુચૈતન્યનિલયા વિષ્ણુસ્વા વિશ્વસાક્ષિણી ॥ ૨૦॥

વિવેકિની વિયદ્રૂપા વિજયા વિશ્વમોહિની ।
વિદ્યાધરી વિધાનજ્ઞા વેદતત્ત્વાર્થરૂપિણી ॥ ૨૧॥

વિરૂપાક્ષી વિરાડ્રૂપા વિક્રમા વિશ્વમઙ્ગલા ।
વિશ્વમ્ભરાસમારાધ્યા વિશ્વભ્રમણકારિણી ॥ ૨૨॥

વિનાયકી વિનોદસ્થા વીરગોષ્ઠીવિવર્ધિની ।
વિવાહરહિતા વિન્ધ્યા વિન્ધ્યાચલનિવાસિની ॥ ૨૩॥

વિદ્યાવિદ્યાકરી વિદ્યા વિદ્યાવિદ્યાપ્રબોધિની ।
વિમલા વિભવા વેદ્યા વિશ્વસ્થા વિવિધોજ્જ્વલા ॥ ૨૪॥

વીરમધ્યા વરારોહા વિતન્ત્રા વિશ્વનાયિકા ।
વીરહત્યાપ્રશમની વિનમ્રજનપાલિની ॥ ૨૫॥

વીરધીર્વિવિધાકારા વિરોધિજનનાશિની ।
તુકારરૂપા તુર્યશ્રીસ્તુલસીવનવાસિની ॥ ૨૬॥

તુરઙ્ગી તુરગારૂઢા તુલાદાનફલપ્રદા ।
તુલામાઘસ્નાનતુષ્ટા તુષ્ટિપુષ્ટિપ્રદાયિની ॥ ૨૭॥

તુરઙ્ગમપ્રસન્તુષ્ટા તુલિતા તુલ્યમધ્યગા ।
તુઙ્ગોત્તુઙ્ગા તુઙ્ગકુચા તુહિનાચલસંસ્થિતા ॥ ૨૮॥

તુમ્બુરાદિસ્તુતિપ્રીતા તુષારશિખરીશ્વરી ।
તુષ્ટા ચ તુષ્ટિજનની તુષ્ટલોકનિવાસિની ॥ ૨૯॥

તુલાધારા તુલામધ્યા તુલસ્થા તુર્યરૂપિણી ।
તુરીયગુણગમ્ભીરા તુર્યનાદસ્વરૂપિણી ॥ ૩૦॥

તુર્યવિદ્યાલાસ્યતુષ્ટા તૂર્યશાસ્ત્રાર્થવાદિની ।
તુરીયશાસ્ત્રતત્ત્વજ્ઞા તૂર્યનાદવિનોદિની ॥ ૩૧॥

તૂર્યનાદાન્તનિલયા તૂર્યાનન્દસ્વરૂપિણી ।
તુરીયભક્તિજનની તુર્યમાર્ગપ્રદર્શિની ॥ ૩૨॥

વકારરૂપા વાગીશી વરેણ્યા વરસંવિધા ।
વરા વરિષ્ઠા વૈદેહી વેદશાસ્ત્રપ્રદર્શિની ॥ ૩૩॥

વિકલ્પશમની વાણી વાઞ્છિતાર્થફલપ્રદા ।
વયસ્થા ચ વયોમધ્યા વયોવસ્થાવિવર્જિતા ॥ ૩૪॥

વન્દિની વાદિની વર્યા વાઙ્મયી વીરવન્દિતા ।
વાનપ્રસ્થાશ્રમસ્થા ચ વનદુર્ગા વનાલયા ॥ ૩૫॥

વનજાક્ષી વનચરી વનિતા વિશ્વમોહિની ।

વસિષ્ઠાવામદેવાદિવન્દ્યા વન્દ્યસ્વરૂપિણી ॥ ૩૬॥

વૈદ્યા વૈદ્યચિકિત્સા ચ વષટ્કારી વસુન્ધરા ।
વસુમાતા વસુત્રાતા વસુજન્મવિમોચની ॥ ૩૭॥

વસુપ્રદા વાસુદેવી વાસુદેવ મનોહરી ।
વાસવાર્ચિતપાદશ્રીર્વાસવારિવિનાશિની ॥ ૩૮॥

વાગીશી વાઙ્મનસ્થાયી વશિની વનવાસભૂઃ ।
વામદેવી વરારોહા વાદ્યઘોષણતત્પરા ॥ ૩૯॥

વાચસ્પતિસમારાધ્યા વેદમાતા વિનોદિની ।
રેકારરૂપા રેવા ચ રેવાતીરનિવાસિની ॥ ૪૦॥

રાજીવલોચના રામા રાગિણિરતિવન્દિતા ।
રમણીરામજપ્તા ચ રાજ્યપા રાજતાદ્રિગા ॥ ૪૧॥

રાકિણી રેવતી રક્ષા રુદ્રજન્મા રજસ્વલા ।
રેણુકારમણી રમ્યા રતિવૃદ્ધા રતા રતિઃ ॥ ૪૨॥

રાવણાનન્દસન્ધાયી રાજશ્રી રાજશેખરી ।
રણમદ્યા રથારૂઢા રવિકોટિસમપ્રભા ॥ ૪૩॥

રવિમણ્ડલમધ્યસ્થા રજની રવિલોચના ।
રથાઙ્ગપાણિ રક્ષોઘ્ની રાગિણી રાવણાર્ચિતા ॥ ૪૪॥

રમ્ભાદિકન્યકારાધ્યા રાજ્યદા રાજ્યવર્ધિની ।
રજતાદ્રીશસક્થિસ્થા રમ્યા રાજીવલોચના ॥ ૪૫॥

રમ્યવાણી રમારાધ્યા રાજ્યધાત્રી રતોત્સવા ।
રેવતી ચ રતોત્સાહા રાજહૃદ્રોગહારિણી ॥ ૪૬॥

રઙ્ગપ્રવૃદ્ધમધુરા રઙ્ગમણ્ડપમધ્યગા ।
રઞ્જિતા રાજજનની રમ્યા રાકેન્દુમધ્યગા ॥ ૪૭॥

રાવિણી રાગિણી રઞ્જ્યા રાજરાજેશ્વરાર્ચિતા ।
રાજન્વતી રાજનીતી રજતાચલવાસિની ॥ ૪૮॥

રાઘવાર્ચિતપાદશ્રી રાઘવા રાઘવપ્રિયા ।
રત્નનૂપુરમધ્યાઢ્યા રત્નદ્વીપનિવાસિની ॥ ૪૯॥

રત્નપ્રાકારમધ્યસ્થા રત્નમણ્ડપમધ્યગા ।
રત્નાભિષેકસન્તુષ્ટા રત્નાઙ્ગી રત્નદાયિની ॥ ૫૦॥

ણિકારરૂપિણી નિત્યા નિત્યતૃપ્તા નિરઞ્જના ।
નિદ્રાત્યયવિશેષજ્ઞા નીલજીમૂતસન્નિભા ॥ ૫૧॥

નીવારશૂકવત્તન્વી નિત્યકલ્યાણરૂપિણી ।
નિત્યોત્સવા નિત્યપૂજ્યા નિત્યાનન્દસ્વરૂપિણી ॥ ૫૨॥

નિર્વિકલ્પા નિર્ગુણસ્થા નિશ્ચિન્તા નિરુપદ્રવા ।
નિસ્સંશયા નિરીહા ચ નિર્લોભા નીલમૂર્ધજા ॥ ૫૩॥

નિખિલાગમમધ્યસ્થા નિખિલાગમસંસ્થિતા ।
નિત્યોપાધિવિનિર્મુક્તા નિત્યકર્મફલપ્રદા ॥ ૫૪॥

નીલગ્રીવા નિરાહારા નિરઞ્જનવરપ્રદા ।
નવનીતપ્રિયા નારી નરકાર્ણવતારિણી ॥ ૫૫॥

નારાયણી નિરીહા ચ નિર્મલા નિર્ગુણપ્રિયા ।
નિશ્ચિન્તા નિગમાચારનિખિલાગમ ચ વેદિની ॥ ૫૬॥

નિમેષાનિમિષોત્પન્ના નિમેષાણ્ડવિધાયિની ।
નિવાતદીપમધ્યસ્થા નિર્વિઘ્ના નીચનાશિની ॥ ૫૭॥

નીલવેણી નીલખણ્ડા નિર્વિષા નિષ્કશોભિતા ।
નીલાંશુકપરીધાના નિન્દઘ્ની ચ નિરીશ્વરી ॥ ૫૮॥

નિશ્વાસોચ્છ્વાસમધ્યસ્થા નિત્યયાનવિલાસિની ।
યઙ્કારરૂપા યન્ત્રેશી યન્ત્રી યન્ત્રયશસ્વિની ॥ ૫૯॥

યન્ત્રારાધનસન્તુષ્ટા યજમાનસ્વરૂપિણી ।
યોગિપૂજ્યા યકારસ્થા યૂપસ્તમ્ભનિવાસિની ॥ ૬૦॥

યમઘ્ની યમકલ્પા ચ યશઃકામા યતીશ્વરી ।
યમાદીયોગનિરતા યતિદુઃખાપહારિણી ॥ ૬૧॥

યજ્ઞા યજ્વા યજુર્ગેયા યજ્ઞેશ્વરપતિવ્રતા ।
યજ્ઞસૂત્રપ્રદા યષ્ટ્રી યજ્ઞકર્મફલપ્રદા ॥ ૬૨॥

યવાઙ્કુરપ્રિયા યન્ત્રી યવદઘ્ની યવાર્ચિતા ।
યજ્ઞકર્ત્રી યજ્ઞભોક્ત્રી યજ્ઞાઙ્ગી યજ્ઞવાહિની ॥ ૬૩॥

યજ્ઞસાક્ષી યજ્ઞમુખી યજુષી યજ્ઞરક્ષિણી ।
ભકારરૂપા ભદ્રેશી ભદ્રકલ્યાણદાયિની ॥ ૬૪॥

ભક્તપ્રિયા ભક્તસખા ભક્તાભીષ્ટસ્વરૂપિણી ।
ભગિની ભક્તસુલભા ભક્તિદા ભક્તવત્સલા ॥ ૬૫॥

ભક્તચૈતન્યનિલયા ભક્તબન્ધવિમોચની ।
ભક્તસ્વરૂપિણી ભાગ્યા ભક્તારોગ્યપ્રદાયિની ॥ ૬૬॥

ભક્તમાતા ભક્તગમ્યા ભક્તાભીષ્ટપ્રદાયિની ।
ભાસ્કરી ભૈરવી ભોગ્યા ભવાની ભયનાશિની ॥ ૬૭॥

ભદ્રાત્મિકા ભદ્રદાયી ભદ્રકાલી ભયઙ્કરી ।
ભગનિષ્યન્દિની ભૂમ્ની ભવબન્ધવિમોચની ॥ ૬૮॥

ભીમા ભવસખા ભઙ્ગીભઙ્ગુરા ભીમદર્શિની ।
ભલ્લી ભલ્લીધરા ભીરુર્ભેરુણ્ડા ભીમપાપહા ॥ ૬૯॥

ભાવજ્ઞા ભોગદાત્રી ચ ભવઘ્ની ભૂતિભૂષણા ।
ભૂતિદા ભૂમિદાત્રી ચ ભૂપતિત્વપ્રદાયિની ॥ ૭૦॥

ભ્રામરી ભ્રમરી ભારી ભવસાગરતારિણી ।
ભણ્ડાસુરવધોત્સાહા ભાગ્યદા ભાવમોદિની ॥ ૭૧॥

ગોકારરૂપા ગોમાતા ગુરુપત્ની ગુરુપ્રિયા ।
ગોરોચનપ્રિયા ગૌરી ગોવિન્દગુણવર્ધિની ॥ ૭૨॥

ગોપાલચેષ્ટાસન્તુષ્ટા ગોવર્ધનવિવર્ધિની ।
ગોવિન્દરૂપિણી ગોપ્ત્રી ગોકુલાનાંવિવર્ધિની ॥ ૭૩॥

ગીતા ગીતપ્રિયા ગેયા ગોદા ગોરૂપધારિણી ।
ગોપી ગોહત્યશમની ગુણિની ગુણિવિગ્રહા ॥ ૭૪॥

ગોવિન્દજનની ગોષ્ઠા ગોપ્રદા ગોકુલોત્સવા ।
ગોચરી ગૌતમી ગઙ્ગા ગોમુખી ગુણવાસિની ॥ ૭૫॥

ગોપાલી ગોમયા ગુમ્ભા ગોષ્ઠી ગોપુરવાસિની ।
ગરુડા ગમનશ્રેષ્ઠા ગારુડા ગરુડધ્વજા ॥ ૭૬॥

ગમ્ભીરા ગણ્ડકી ગુણ્ડા ગરુડધ્વજવલ્લભા ।

ગગનસ્થા ગયાવાસા ગુણવૃત્તિર્ગુણોદ્ભવા ॥ ૭૭॥

દેકારરૂપા દેવેશી દૃગ્રૂપા દેવતાર્ચિતા ।
દેવરાજેશ્વરાર્ધાઙ્ગી દીનદૈન્યવિમોચની ॥ ૭૮॥

દેકાલપરિજ્ઞાના દેશોપદ્રવનાશિની ।
દેવમાતા દેવમોહા દેવદાનવમોહિની ॥ ૭૯॥

દેવેન્દ્રાર્ચિતપાદશ્રી દેવદેવપ્રસાદિની ।
દેશાન્તરી દેશરૂપા દેવાલયનિવાસિની ॥ ૮૦॥

દેશભ્રમણસન્તુષ્ટા દેશસ્વાસ્થ્યપ્રદાયિની ।
દેવયાના દેવતા ચ દેવસૈન્યપ્રપાલિની ॥ ૮૧॥

વકારરૂપા વાગ્દેવી વેદમાનસગોચરા ।
વૈકુણ્ઠદેશિકા વેદ્યા વાયુરૂપા વરપ્રદા ॥ ૮૨॥

વક્રતુણ્ડાર્ચિતપદા વક્રતુણ્ડપ્રસાદિની ।
વૈચિત્ર્યરૂપા વસુધા વસુસ્થાના વસુપ્રિયા ॥ ૮૩॥

વષટ્કારસ્વરૂપા ચ વરારોહા વરાસના ।
વૈદેહી જનની વેદ્યા વૈદેહીશોકનાશિની ॥ ૮૪॥

વેદમાતા વેદકન્યા વેદરૂપા વિનોદિની ।
વેદાન્તવાદિની ચૈવ વેદાન્તનિલયપ્રિયા ॥ ૮૫॥

વેદશ્રવા વેદઘોષા વેદગીતા વિનોદિની ।
વેદશાસ્ત્રાર્થતત્ત્વજ્ઞા વેદમાર્ગ પ્રદર્શિની ॥ ૮૬॥

વૈદિકીકર્મફલદા વેદસાગરવાડવા ।
વેદવન્દ્યા વેદગુહ્યા વેદાશ્વરથવાહિની ॥ ૮૭॥

વેદચક્રા વેદવન્દ્યા વેદાઙ્ગી વેદવિત્કવિઃ ।
સકારરૂપા સામન્તા સામગાન વિચક્ષણા ॥ ૮૮॥

સામ્રાજ્ઞી નામરૂપા ચ સદાનન્દપ્રદાયિની ।
સર્વદૃક્સન્નિવિષ્ટા ચ સર્વસમ્પ્રેષિણીસહા ॥ ૮૯॥

સવ્યાપસવ્યદા સવ્યસધ્રીચી ચ સહાયિની ।
સકલા સાગરા સારા સાર્વભૌમસ્વરૂપિણી ॥ ૯૦॥

સન્તોષજનની સેવ્યા સર્વેશી સર્વરઞ્જની ।
સરસ્વતી સમારાધ્યા સામદા સિન્ધુસેવિતા ॥ ૯૧॥

સમ્મોહિની સદામોહા સર્વમાઙ્ગલ્યદાયિની ।
સમસ્તભુવનેશાની સર્વકામફલપ્રદા ॥ ૯૨॥

સર્વસિદ્ધિપ્રદા સાધ્વી સર્વજ્ઞાનપ્રદાયિની ।
સર્વદારિદ્ર્યશમની સર્વદુઃખવિમોચની ॥ ૯૩॥

સર્વરોગપ્રશમની સર્વપાપવિમોચની ।
સમદૃષ્ટિસ્સમગુણા સર્વગોપ્ત્રી સહાયિની ॥ ૯૪॥

સામર્થ્યવાહિનિ સાઙ્ખ્યા સાન્દ્રાનન્દપયોધરા ।
સઙ્કીર્ણમન્દિરસ્થાના સાકેતકુલપાલિની ॥ ૯૫॥

સંહારિણી સુધારૂપા સાકેતપુરવાસિની ।
સમ્બોધિની સમસ્તેશી સત્યજ્ઞાનસ્વરૂપિણી ॥ ૯૬॥

સમ્પત્કરી સમાનાઙ્ગી સર્વભાવસુસંસ્થિતા ।
સન્ધ્યાવન્દનસુપ્રીતા સન્માર્ગકુલપાલિની ॥ ૯૭॥

સઞ્જીવિની સર્વમેધા સભ્યા સાધુસુપૂજિતા ।
સમિદ્ધા સામિધેની ચ સામાન્યા સામવેદિની ॥ ૯૮॥

સમુત્તીર્ણા સદાચારા સંહારા સર્વપાવની ।
સર્પિણી સર્પમાતા ચ સમાદાનસુખપ્રદા ॥ ૯૯॥

સર્વરોગપ્રશમની સર્વજ્ઞત્વફલપ્રદા ।
સઙ્ક્રમા સમદા સિન્ધુઃ સર્ગાદિકરણક્ષમા ॥ ૧૦૦॥

સઙ્કટા સઙ્કટહરા સકુઙ્કુમવિલેપના ।
સુમુખા સુમુખપ્રીતા સમાનાધિકવર્જિતા ॥ ૧૦૧॥

સંસ્તુતા સ્તુતિસુપ્રીતા સત્યવાદી સદાસ્પદા ।
ધીકારરૂપા ધીમાતા ધીરા ધીરપ્રસાદિની ॥ ૧૦૨॥

ધીરોત્તમા ધીરધીરા ધીરસ્થા ધીરશેખરા ।
ધૃતિરૂપા ધનાઢ્યા ચ ધનપા ધનદાયિની ॥ ૧૦૩॥

ધીરૂપા ધીરવન્દ્યા ચ ધીપ્રભા ધીરમાનસા ।
ધીગેયા ધીપદસ્થા ચ ધીશાના ધીપ્રસાદિની ॥ ૧૦૪॥

મકારરૂપા મૈત્રેયા મહામઙ્ગલદેવતા ।
મનોવૈકલ્યશમની મલયાચલવાસિની ॥ ૧૦૫॥

મલયધ્વજરાજશ્રીર્માયામોહવિભેદિની ।
મહાદેવી મહારૂપા મહાભૈરવપૂજિતા ॥ ૧૦૬॥

મનુપ્રીતા મન્ત્રમૂર્તિર્મન્ત્રવશ્યા મહેશ્વરી ।
મત્તમાતઙ્ગગમના મધુરા મેરુમણ્ટપા ॥ ૧૦૭॥

મહાગુપ્તા મહાભૂતા મહાભયવિનાશિની ।
મહાશૌર્યા મન્ત્રિણી ચ મહાવૈરિવિનાશિની ॥ ૧૦૮॥

મહાલક્ષ્મીર્મહાગૌરી મહિષાસુરમર્દિની ।
મહી ચ મણ્ડલસ્થા ચ મધુરાગમપૂજિતા ॥ ૧૦૯॥

મેધા મેધાકરી મેધ્યા માધવી મધુમર્ધિની ।
મન્ત્રા મન્ત્રમયી માન્યા માયા માધવમન્ત્રિણી ॥ ૧૧૦॥

માયાદૂરા ચ માયાવી માયાજ્ઞા માનદાયિની ।
માયાસઙ્કલ્પજનની માયામાયવિનોદિની ॥ ૧૧૧॥

માયા પ્રપઞ્ચશમની માયાસંહારરૂપિણી ।
માયામન્ત્રપ્રસાદા ચ માયાજનવિમોહિની ॥ ૧૧૨॥

મહાપથા મહાભોગા મહવિઘ્નવિનાશિની ।
મહાનુભાવા મન્ત્રાઢ્યા મહમઙ્ગલદેવતા ॥ ૧૧૩॥

હિકારરૂપા હૃદ્યા ચ હિતકાર્યપ્રવર્ધિની ।
હેયોપાધિવિનિર્મુક્તા હીનલોકવિનાશિની ॥ ૧૧૪॥

હ્રીંકારી હ્રીમતી હૃદ્યા હ્રીં દેવી હ્રીં સ્વભાવિની ।
હ્રીં મન્દિરા હિતકરા હૃષ્ટા ચ હ્રીં કુલોદ્ભવા ॥ ૧૧૫॥

હિતપ્રજ્ઞા હિતપ્રીતા હિતકારુણ્યવર્ધિની ।
હિતાસિની હિતક્રોધા હિતકર્મફલપ્રદા ॥ ૧૧૬॥

હિમા હૈમવતી હૈમ્ની હેમાચલનિવાસિની ।
હિમાગજા હિતકરી હિતકર્મસ્વભાવિની ॥ ૧૧૭॥

ધીકારરૂપા ધિષણા ધર્મરૂપા ધનેશ્વરી ।

ધનુર્ધરા ધરાધારા ધર્મકર્મફલપ્રદા ॥ ૧૧૮॥

ધર્માચારા ધર્મસારા ધર્મમધ્યનિવાસિની ।
ધનુર્વિદ્યા ધનુર્વેદા ધન્યા ધૂર્તવિનાશિની ॥ ૧૧૯॥

ધનધાન્યા ધેનુરૂપા ધનાઢ્યા ધનદાયિની ।
ધનેશી ધર્મનિરતા ધર્મરાજપ્રસાદિની ॥ ૧૨૦॥

ધર્મસ્વરૂપા ધર્મેશી ધર્માધર્મવિચારિણી ।
ધર્મસૂક્ષ્મા ધર્મગેહા ધર્મિષ્ઠા ધર્મગોચરા ॥ ૧૨૧॥

યોકારરૂપા યોગેશી યોગસ્થા યોગરૂપિણી ।
યોગ્યા યોગીશવરદા યોગમાર્ગનિવાસિની ॥ ૧૨૨॥

યોગાસનસ્થા યોગેશી યોગમાયાવિલાસિની ।
યોગિની યોગરક્તા ચ યોગાઙ્ગી યોગવિગ્રહા ॥ ૧૨૩॥

યોગવાસા યોગભાગ્યા યોગમાર્ગપ્રદર્શિની ।
યોકારરૂપા યોધાઢ્યાયોધ્રી યોધસુતત્પરા ॥ ૧૨૪॥

યોગિની યોગિનીસેવ્યા યોગજ્ઞાનપ્રબોધિની ।
યોગેશ્વરપ્રાણાનાથા યોગીશ્વરહૃદિસ્થિતા ॥ ૧૨૫॥

યોગા યોગક્ષેમકર્ત્રી યોગક્ષેમવિધાયિની ।
યોગરાજેશ્વરારાધ્યા યોગાનન્દસ્વરૂપિણી ॥ ૧૨૬॥

નકારરૂપા નાદેશી નામપારાયણપ્રિયા ।
નવસિદ્ધિસમારાધ્યા નારાયણમનોહરી ॥ ૧૨૭॥

નારાયણી નવાધારા નવબ્રહ્માર્ચિતાંઘ્રિકા ।
નગેન્દ્રતનયારાધ્યા નામરૂપવિવર્જિતા ॥ ૧૨૮॥

નરસિંહાર્ચિતપદા નવબન્ધવિમોચની ।
નવગ્રહાર્ચિતપદા નવમીપૂજનપ્રિયા ॥ ૧૨૯॥

નૈમિત્તિકાર્થફલદા નન્દિતારિવિનાશિની ।
નવપીઠસ્થિતા નાદા નવર્ષિગણસેવિતા ॥ ૧૩૦॥

નવસૂત્રાવિધાનજ્ઞા નૈમિશારણ્યવાસિની ।
નવચન્દનદિગ્ધાઙ્ગી નવકુઙ્કુમધારિણી ॥ ૧૩૧॥

નવવસ્ત્રપરીધાના નવરત્નવિભૂષણા ।
નવ્યભસ્મવિદગ્ધાઙ્ગી નવચન્દ્રકલાધરા ॥ ૧૩૨॥

પ્રકારરૂપા પ્રાણેશી પ્રાણસંરક્ષણીપરા ।
પ્રાણસઞ્જીવિની પ્રાચ્યા પ્રાણિપ્રાણપ્રબોધિની ॥ ૧૩૩॥

પ્રજ્ઞા પ્રાજ્ઞા પ્રભાપુષ્પા પ્રતીચી પ્રભુદા પ્રિયા ।
પ્રાચીના પ્રાણિચિત્તસ્થા પ્રભા પ્રજ્ઞાનરૂપિણી ॥ ૧૩૪॥

પ્રભાતકર્મસન્તુષ્ટા પ્રાણાયામપરાયણા ।
પ્રાયજ્ઞા પ્રણવા પ્રાણા પ્રવૃત્તિઃ પ્રકૃતિઃ પરા ॥ ૧૩૫॥

પ્રબન્ધા પ્રથમા ચૈવ પ્રગા પ્રારબ્ધનાશિની ।
પ્રબોધનિરતા પ્રેક્ષ્યા પ્રબન્ધા પ્રાણસાક્ષિણી ॥ ૧૩૬॥

પ્રયાગતીર્થનિલયા પ્રત્યક્ષપરમેશ્વરી ।
પ્રણવાદ્યન્તનિલયા પ્રણવાદિઃ પ્રજેશ્વરી ॥ ૧૩૭॥

ચોકારરૂપા ચોરઘ્ની ચોરબાધાવિનાશિની ।
ચૈતન્યચેતનસ્થા ચ ચતુરા ચ ચમત્કૃતિઃ ॥ ૧૩૮॥

ચક્રવર્તિકુલાધારા ચક્રિણી ચક્રધારિણી ।
ચિત્તચેયા ચિદાનન્દા ચિદ્રૂપા ચિદ્વિલાસિની ॥ ૧૩૯॥

ચિન્તાચિત્તપ્રશમની ચિન્તિતાર્થફલપ્રદા ।
ચામ્પેયી ચમ્પકપ્રીતા ચણ્ડી ચણ્ડાટ્ટહાસિની ॥ ૧૪૦॥

ચણ્ડેશ્વરી ચણ્ડમાતા ચણ્ડમુણ્ડવિનાશિની ।
ચકોરાક્ષી ચિરપ્રીતા ચિકુરા ચિકુરાલકા ॥ ૧૪૧॥

ચૈતન્યરૂપિણી ચૈત્રી ચેતના ચિત્તસાક્ષિણી ।
ચિત્રા ચિત્રવિચિત્રાઙ્ગી ચિત્રગુપ્તપ્રસાદિની ॥ ૧૪૨॥

ચલના ચક્રસંસ્થા ચ ચામ્પેયી ચલચિત્રિણી ।
ચન્દ્રમણ્ડલમધ્યસ્થા ચન્દ્રકોટિસુશીતલા ॥ ૧૪૩॥

ચન્દ્રાનુજસમારાધ્યા ચન્દ્રા ચણ્ડમહોદરી ।
ચર્ચિતારિશ્ચન્દ્રમાતા ચન્દ્રકાન્તા ચલેશ્વરી ॥ ૧૪૪॥

ચરાચરનિવાસી ચ ચક્રપાણિસહોદરી ।
દકારરૂપા દત્તશ્રીદારિદ્ર્યચ્છેદકારિણી ॥ ૧૪૫॥

દત્તાત્રેયસ્ય વરદા દર્યા ચ દીનવત્સલા ।
દક્ષારાધ્યા દક્ષકન્યા દક્ષયજ્ઞવિનાશિની ॥ ૧૪૬॥

દક્ષા દાક્ષાયણી દીક્ષા દૃષ્ટા દક્ષવરપ્રદા ।
દક્ષિણા દક્ષિણારાધ્યા દક્ષિણામૂર્તિરૂપિણી ॥ ૧૪૭॥

દયાવતી દમસ્વાન્તા દનુજારિર્દયાનિધિઃ ।
દન્તશોભનિભા દેવી દમના દાડિમસ્તના ॥ ૧૪૮॥

દણ્ડા ચ દમયત્રી ચ દણ્ડિની દમનપ્રિયા ।
દણ્ડકારણ્યનિલયા દણ્ડકારિવિનાશિની ॥ ૧૪૯॥

દંષ્ટ્રાકરાલવદના દણ્ડશોભા દરોદરી ।
દરિદ્રારિષ્ટશમની દમ્યા દમનપૂજિતા ॥ ૧૫૦॥

દાનવાર્ચિત પાદશ્રીર્દ્રવિણા દ્રાવિણી દયા ।
દામોદરી દાનવારિર્દામોદરસહોદરી ॥ ૧૫૧॥

દાત્રી દાનપ્રિયા દામ્ની દાનશ્રીર્દ્વિજવન્દિતા ।
દન્તિગા દણ્ડિની દૂર્વા દધિદુગ્ધસ્વરૂપિણી ॥ ૧૫૨॥

દાડિમીબીજસન્દોહા દન્તપઙ્ક્તિવિરાજિતા ।
દર્પણા દર્પણસ્વચ્છા દ્રુમમણ્ડલવાસિની ॥ ૧૫૩॥

દશાવતારજનની દશદિગ્દૈવપૂજિતા ।
દમા દશદિશા દૃશ્યા દશદાસી દયાનિધિઃ ॥ ૧૫૪॥

દેશકાલપરિજ્ઞાના દેશકાલવિશોધિની ।
દશમ્યાદિકલારાધ્યા દશકાલવિરોધિની ।
દશમ્યાદિકલારાધ્ય દશગ્રીવવિરોધિની ॥ ૧૫૫॥

દશાપરાધશમની દશવૃત્તિફલપ્રદા ।
યાત્કારરૂપિણી યાજ્ઞી યાદવી યાદવાર્ચિતા ॥ ૧૫૬॥

યયાતિપૂજનપ્રીતા યાજ્ઞિકી યાજકપ્રિયા ।
યજમાના યદુપ્રીતા યામપૂજાફલપ્રદા ॥ ૧૫૭॥

યશસ્વિની યમારાધ્યા યમકન્યા યતીશ્વરી ।
યમાદિયોગસન્તુષ્ટા યોગીન્દ્રહૃદયા યમા ॥ ૧૫૮॥

યમોપાધિવિનિર્મુક્તા યશસ્યવિધિસન્નુતા ।
યવીયસી યુવપ્રીતા યાત્રાનન્દા યતીશ્વરી ॥ ૧૫૯॥

યોગપ્રિયા યોગગમ્યા યોગધ્યેયા યથેચ્છગા ।
યોગપ્રિયા યજ્ઞસેની યોગરૂપા યથેષ્ટદા ॥ ૧૬૦॥

॥ ઇતિ શ્રીગાયત્રી દિવ્યસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

(This is a shorter version, more prevalent in
print but without pUrvipIThikA and phalashrutiH.
The extended version has variations also.)

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

---

*Shri Gayatri Sahasranama Stotram*

pdf was typeset on January 7, 2024

Please send corrections to *sanskrit@cheerful.com*